फल इति भाषा ॥ ( जले कण्टकः प्रचुरिव । ) कुम्भीरः । इति हारावली । ७६ ॥

जलकपिः, पुं, ( जले कपिरिव । ) शिशुमारः । इति हारावली । ७७ ॥

जलकरङ्कः, पुं, ( जलपूर्णः करङ्कः । मध्यपदलोपिसमासः । ) नारिकेलफलम् । ( जले करङ्कः अग्रस्थनारिकेलफलास्थि इव ।) पद्मम् । शङ्खः । जललता । मेघः । इति मेदिनी । के, २२८ ॥

जलकल्कः, पुं, ( जलस्य कल्क इव । ) जम्बालः । इति हारावली । २०५ ॥

जलकाकः, पुं, ( जले जलस्य वा काक इव । ) पक्षिविशेषः । पानीकौड़ि इति भाषा ॥ तत्पर्य्यायः । दात्यूहः २ कालकण्टकः ३ । अस्य मांसगुणाः । स्निग्धं गुरु हिमं वृष्यं मांसं जलपक्षिणान्तु वातहरम् । इति राजनिर्घण्टः ॥

जलकाङ्क्षः, पुं, स्त्री, (जलं काङ्क्षति अभिलषतीति । जल + काङ्क्ष + "कर्म्मण्यण् ।" ३ । २ । १ । इत्यण् । ) हस्ती । इति त्रिकाण्डशेषः ॥

जलकाङ्क्षी, [ न् ] पुं स्त्री, ( जलं काङ्क्षति अभिलषतीति । काङ्क्ष + णिनिः । ) हस्ती । इति हारावली । १४ ॥ जलाभिलाषिणि, त्रि ॥

जलकान्तारः, पुं, ( जलमेव कान्तारं दुर्गमपथो यस्य यस्मै इति वा । जलाधिष्ठातृत्वादेवास्य तथात्वम् ।) वरुणः । इति हेमचन्द्रः । २।१०२॥

जलकामुकः, पुं, ( जलस्य कामुकः अभिलाषुकः ।) कुटुम्बिनीवृक्षः । इति राजनिर्घण्टः ॥ ( स्त्री, अर्कपुष्पी । यथा, भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ।
"अर्कपुष्पी क्रूरकर्म्मा पयस्या जलकामुका ॥" )

जलकिराटः, पुं, ( जले किरः शूकर इव अटति गच्छतीति । अट + अच् । ) ग्राहः । इति हारावली । ७७ ॥

जलकुक्कुटी, स्त्री, ( जले कुक्कुट इव । ततः स्त्रियां जातित्वात् ङीष् । ) गङ्गाचिल्ली । इति हारावली । ८६ ॥

जलकुक्कुभः, पुं, ( जले कुक्कुभः पक्षिविशेष इव । ) जलचरपक्षिविशेषः । कोड़ापाखी इतिभाषा॥ तत्पर्य्यायः । कोयष्टिः २ शिखरी ३ । इति हेमचन्द्रः ॥

जलकुन्तलः, पुं, ( जलस्य कुन्तलः केश इव । ) शैवालम् । इति भूरिप्रयोगः ॥ ( शैवालशब्देऽस्य विवृतिर्विधेया ॥ )

जलकूपी, स्त्री, ( जलस्य कूपीव । ) कूपगर्त्तः । पुष्करिणी । इति मेदिनी । पे, २४ ॥

जलकूर्म्मः, पुं, ( जले कूर्म्म इव । प्लवनसमये कूर्म्मस्येव दृश्यत्वादस्य तथात्वम् । ) शिशुमारः । इति त्रिकाण्डशेषः ॥

जलकेशः, पुं, ( जलस्य केश इव । ) शैवालम् । इति हारावली । १०६ ॥

जलक्रीड़ा, स्त्री, ( जलेन जले वा क्रीड़ा । ) नद्यादौ वयस्यादिभिः सह जलनिःक्षेपादिरूपक्रीड़ा । तत्पर्य्यायः । करपाञ्चमृ २ यालुची ३ करपत्रिका ४ । इति हारावली । ११६ ॥ ( यथा, महाभारते । १ । १२८ । ३६ ।
"सहिता भ्रातरः सर्व्वे जलक्रीड़ामवाप्नुम ॥")

जलगुल्मः, पुं, ( जलस्य गुल्म इव । ) जलावर्त्तः । कच्छपः । जलचत्वरम् । इति मेदिनी । मे, ६० ॥

जलङ्गः, पुं, ( जलं गच्छतीति । जल + गम् + डः । ततो मुम् । ) महाकालः । लताविशेषः । इति राजनिर्घण्टः ॥

जलङ्गमः, पुं, ( जलं ग्रामान्तजलभूमिं गच्छतीति । जल + गम + "गमश्च ।" ३ । २ । ४७ । इति खच् मुम् च । ग्रामान्तवासित्वादेवास्य तथात्वम् । ) जनङ्गमः । चाण्डालः । इत्यमरटीकायां भरतः ॥

जलचारी, [ न् ] पुं, ( जले चरतीति । चर + णिनिः । ) मत्स्यः । इति शब्दचन्द्रिका ॥ जलचरे, त्रि ॥ ( यथा, रामायणे । ३ । १५ । ६ ।
"ददृशुः सहिता रम्यं तड़ागं योजनायतम् ।
शरारिहंसकुररैराकीर्णं जलचारिभिः ॥" )

जलजं, क्ली, ( जले जायते इति । जन + डः । ) पद्मम् । ( यथा, कुमारे । २ । ३० ।
"वाचस्पतिरुवाचेदं प्राञ्जलिर्ज्जलजासनम् ॥" ) शङ्खः । इति मेदिनी । जे, २४ ॥ ( यथा, रघुः । ७ । ६३ ।
"ततः प्रियोपात्तरसेऽधरोष्ठे
निवेश्य दध्मौ जलजं कुमारः ॥")
लोणारम् । इति राजनिर्घण्टः ॥

जलजः, पुं, (जले जायते इति। जल + जन् + डः।) मत्स्यः । इति शब्दचन्द्रिका ॥ ( यथा, रामायणे । २ । ६१ । २२ ।
"स तादृशः सिंहबलो वृषभाक्षो नरर्षभः ।
स्वयमेव हतः पित्रा जलजेनात्मजो यथा ॥" )
जले निवासात् कुम्भीरशिशुमारादयः । एषां मांसगुणाः । गुरुत्वम् । उष्णत्वम् । मधुरत्वम् । स्निग्धत्वम् । वातनाशित्वम् । शुक्रवर्द्धनत्वञ्च । इति राजवल्लभः ॥ हिज्जलवृक्षः । शैवलः । वानीरवृक्षः । शङ्खः । इति राजनिर्घण्टः ॥ कुपीलुः । इति भावप्रकाशः ॥ कर्कटमीनकुम्भराशयः मकरशेषार्द्धञ्च । इति दीपिका ॥ जलजाते, त्रि ॥ ( यथा, हरिवंशे । ६७ । ३२ ।
"जलजैः प्राणिभिः कीर्णां जलजैर्भूषितां शुभैः ।
जलजैः कुसुमैश्चित्रां जलजैर्हरितोदकाम् ॥" )

जलजन्तुः, पुं, ( जलजातो जन्तुः । ) जलजप्राणी । तत्पर्य्यायः । यादः २ । इत्यमरः । १।१०।२० ॥

जलजन्तुका, स्त्री, ( जलजो जन्तुः । ततः संज्ञायां कन् । स्त्रियां टाप् । ) जलौका । इति भरतः ॥

जलजन्मा, [ न् ] क्ली, ( जले जन्म यस्य ।) पद्मम् । इति हेमचन्द्रः । ४ । २२८ ॥ (शावरकन्दके, पुं । तद्यथा,—
"जन्तुका जलजन्मा च तथा शावरकन्दकम् ॥"
इत्युत्तरस्थानेऽष्टादशेऽध्याये वाभटेनोक्तम् ॥)

जलजम्बूका, स्त्री, ( जलप्रधाना जम्बूका क्षुद्रजम्बूः । ) क्षुद्रजम्बूः । इति भावप्रकाशः ॥ भूँइजाम इति वनजाम इति च भाषा ॥

जलजिह्वः, पुं, ( जड़ा स्वादग्रहणासमर्था जिह्वा यस्य । डस्य लः ।) नक्रः । इति हारावली ।७६॥

जलडिम्बः, पुं, ( जले डिम्ब इव । ) शम्बूकः । इति हारावली । ११२ ॥ (शम्बूकशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

जलतापिकः, पुं, ( जलतापिन् + संज्ञायां कन् । ) इल्लीशमत्स्यः । काकचीमत्स्यः । इति शब्दरत्नावली ॥

जलतापी, [ न् ] पुं, (जलेऽपि तपति प्रकाशयतीति वेति । तप + णिनिः । ) इल्लीशमत्स्यः । इति शब्दरत्नावली ॥

जलतालः, पुं, (जलं अगाधसलिलं तलति आश्रयत्वेन गच्छतीति । तल + अण् । ) इल्लीशमत्स्यः । इति त्रिकाण्डशेषः ॥

जलतिक्तिका, स्त्री, ( स्वल्पा तिक्ता तिक्तिका । स्वल्पार्थे कन् । जलप्रधाना तिक्तिका । ) शल्लकीवृक्षः । इति राजनिर्घण्टः ॥

जलत्रा, स्त्री, ( जलात् त्रायते इति । त्रै + कः । ) छत्रम् । इति हारावली । ४० ॥

जलदः, पुं, ( जलं ददातीति । दा + कः । ) मेघः । (यथा, मेघदूते । १३ ।
"मार्गं तावत् शृणु कथयतस्त्वत्प्रयाणानुरूपं
सन्देशं मे तदनु जलद ! श्रोष्यसि श्रोत्रपेयम् ॥")
मुस्तकम् । इति मेदिनी । दे, २८ ॥ (यथा,—
"अम्लता-नागर-सहचर-भद्रोत्कट-पद्मबिल्व-
जलदजलम् ।
शृतशीतं मधुयुक्तं निवारयति सूतिकातङ्कम् ॥"
इति वैद्यकचक्रपाणिसंग्रहे सूतिकाधिकारे ॥
शाकद्वीपान्तर्गतवर्षविशेषः । यथा, महाभारते । ६ । ११ । २२—२३ ।
"वर्षाणि तेषु कौरव्य ! सम्प्रोक्तानि मनीषिभिः ।
महामेरुर्महाकाशो जलदः कुमुदोत्तरः ।
जलधारो महाराज ! सुकुमार इति स्मृतः ॥")

जलदागमः, पुं, ( जलदानां मेघानां आगम आगमनं यत्र । ) वर्षाकालः । इति राजनिर्घण्टः ( यथाह वररुचिः ।
"भद्रं कृतं कृतं मौनं कोकिलैर्जलदागमे ।
दर्द्दुरा यत्र वक्तारस्तत्र मौनं हि शोभनम् ॥")

जलदाशनः, पुं, ( अश्यते भक्ष्यते इति । अश + कर्म्मणि ल्युट् । जलदानां मेघानामशनः । मेघाः शालपत्रं भक्षयन्तीति प्रसिद्धेः । ) शालवृक्षः । इति शब्दचन्द्रिका ॥

जलधरः, पुं, ( धरतीति धरः । धृ + अच् । जलस्य धरः । ) मेघः । ( यथा, महाभारते । १ । १३५ । १८ ।
"नभो जलधरैर्हीनं साङ्गारक इवांशुमान् ॥")
मुस्तकम् । इत्यमरः । १।३ । ७,२ । ४ । १५६॥ समुद्रः । इति हेमचन्द्रः ॥ तिनिशवृक्षः । इति राजनिर्घण्टः ॥ जलधारिणि, त्रि ॥